# tArA pratyangirA kavacham

# તારા પ્રત્યઙ્ગિરાકવચમ્

## Document Information

Text title : tArApratyangirA kavacha

File name : tArApratyangirA.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : KM

Proofread by : KM

Latest update : August 21, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# તારા પ્રત્યઙ્ગિરાકવચમ્

ૐ પ્રત્યઙ્ગિરાયૈ નમઃ ।

ઈશ્વર ઉવાચ -

ૐ તારાયાઃ સ્તમ્ભિની દેવી મોહિની ક્ષોભિની તથા ।
હસ્તિની ભ્રામિની રૌદ્રી સંહારણ્યાપિ તારિણી ॥ ૧॥

શક્તયોહષ્ટૌ ક્રમાદેતા શત્રુપક્ષે નિયોજિતાઃ ।
ધારિતા સાધકેન્દ્રેણ સર્વશત્રુ નિવારિણી ॥ ૨॥

ૐ સ્તમ્ભિની સ્ત્રેં સ્ત્રેં મમ શત્રુન્ સ્તમ્ભય સ્તમ્ભય ॥ ૩॥

ૐ ક્ષોભિણી સ્ત્રેં સ્ત્રેં મમ શત્રુન્ ક્ષોભય ક્ષોભય ॥ ૪॥

ૐ મોહિની સ્ત્રેં સ્ત્રેં મમ શત્રુન્ મોહય મોહય ॥ ૫॥

ૐ જૃમ્ભિણી સ્ત્રેં સ્ત્રેં મમ શત્રુન્ જૃમ્ભય જૃમ્ભય ॥ ૬॥

ૐ ભ્રામિની સ્ત્રેં સ્ત્રેં મમ શત્રુન્ ભ્રામય ભ્રામય ॥ ૭॥

ૐ રૌદ્રી સ્ત્રેં સ્ત્રેં મમ શત્રુન્ સન્તાપય સન્તાપય ॥ ૮॥

ૐ સંહારિણી સ્ત્રેં સ્ત્રેં મમ શત્રુન્ સંહારય સંહારય ॥ ૯॥

ૐ તારિણી સ્ત્રેં સ્ત્રેં સર્વપદ્ભ્યઃ સર્વભૂતેભ્યઃ સર્વત્ર
રક્ષ રક્ષ માં સ્વાહા ॥ ૧૦॥

ય ઇમાં ધારયેત્ વિદ્યાં ત્રિસન્ધ્યં વાપિ યઃ પઠેત્ ।
સ દુઃખં દૂરતસ્ત્યક્ત્વા હ્યન્યાચ્છ્ત્રુન્ ન સંશયઃ ॥ ૧૧॥

રણે રાજકુલે દુર્ગે મહાભયે વિપત્તિષુ ।
વિદ્યા પ્રત્યઙ્ગિરા હ્યેષા સર્વતો રક્ષયેન્નરમ્ ॥ ૧૨॥

અનયા વિદ્યયા રક્ષાં કૃત્વા યસ્તુ પઠેત્ સુધી ।
મન્ત્રાક્ષરમપિ ધ્યાયન્ ચિન્તયેત્ નીલસરસ્વતીમ્ ।

અચિરે નૈવ તસ્યાસન્ કરસ્થા સર્વસિદ્ધયઃ
ૐ હ્રીં ઉગ્રતારાયૈ નીલસરસ્વત્યૈ નમઃ ॥ ૧૩॥

ઇમં સ્તવં ધીયાનો નિત્યં ધારયેન્નરઃ ।
સર્વતઃ સુખમાપ્નોતિ સર્વત્રજયમાપ્નુયાત્ ॥ ૧૪॥

નક્કાપિ ભયમાપ્નોતિ સર્વત્રસુખમાપ્નુયાત્ ॥ ૧૫॥

ઇતિ રુદ્રયામલે શ્રીમદુગ્રતરાયા પ્રત્યઙ્ગિરા કવચં સમાપ્તમ્ ॥

This piece of verse from Rudrayamalam does not look like a kavacham, rather looks like a stotra. But this a kavacha. All kavacha of Mahavidya coupled with Pratyingira is of this form. It is not a Abhicharik kavacha and should not be misused for Abhicharik karma (malevolent practices). Rather "Shatru" in this kavacha refers to inner senses of Sadhak, which refrains him/her from watching the divine light. - A note.

---

*tArA pratyangirA kavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*